# संस्कृत-वार्ता:

## दिनाङ्क :-23.09.2024

## प्रात: - 06:55

## अथ वार्ताः

**प्रधानमंत्री- प्रवासी**

भारतीयप्रवासिनः राष्ट्रदूत इति सम्बोधयन् प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् ते सर्वदा देशस्य सशक्ततमाः राष्ट्रदूताः एव। प्रधानमन्त्रिणा गतरात्रौ न्यूयोर्क नगरस्य लाङ्ग-द्वीपे नासाउ कोलिजियम-नगरे एकस्मिन् कार्यक्रमे भारतीयसमुदायस्य विशालं जनसमागमं सम्बोधयन् इदम् उक्तम्। भारत-अमेरिका-द्विपक्षीयसम्बन्धेषु भारतीयप्रवासिनः भूमिकायाः प्रशंसाम् कुर्वन् श्रीमोदी अवदत् यत् विश्वस्य कृते एआइ इति कृत्रिमबुद्धिः इति अर्थः, परन्तु सः मन्यते यत् एआइ इति अमेरिका-भारतीय-भावनायाः अपि प्रतिनिधित्वं करोति। सः अवदत्, भारतीयप्रवासिनः अमेरिकां भारतेन सह भारतं अमेरिका देशेन च सह सम्योजितवन्तः तेषां कौशलं प्रतिभा च अव्याख्यितमस्ति। प्रधानमन्त्रिणा अमेरिकीराष्ट्रपतिनः जो बाइडेन् इत्यस्य गृहे आतिथ्यग्रहणानन्तरं कृतज्ञतां प्रकटितवान्, चत्वारिंशदधिकैकशतकोटिभारतीयानां कृते अयं गौरववह: इति सः अवदत्। श्रीमोदी उक्तवान् यत् अमेरिकादेशस्य बोस्टन्- लॉस-एन्जल्स-नगरे च द्वौ नूतनौ भारतीयवाणिज्यदूतावासौ उद्घाटितौ भविष्यतः। एषः विस्तारः सम्पूर्णे अमेरिकादेशे भारतीयप्रवासीभिः सह सम्बन्धं सुदृढं कर्तुं भारतस्य प्रतिबद्धतां प्रकटयति। भारतस्य सम्प्रति न्यूयॉर्क, अटलाण्टा, शिकागो, ह्यूस्टन्, सैन्फ्रांसिस्को, सिएटल इत्यादिसु च षट् वाणिज्यदूतावासाः सन्ति।

**प्रधानमंत्री- कुवैत**

प्रधानमन्त्री नरेन्द्रमोदी न्यूयोर्कनगरे कुवैतस्य युवराज्ञा शेख-सबा-खालिद अल-हमाद अल-सबा अल-सबा इत्यनेन सह द्विपक्षीयवार्तालापं कृतवान्। सः नेपालस्य स्वीय समकक्षेण के.पी.शर्मा ओली इत्यनेन सहापि वार्ताम् अकरोत्। प्रधानमन्त्री मोदी वर्तुलाकारे एकस्मिन् सम्मेलने व्यापारनेतृभिः सह उदीयमानप्रौद्योगिकीसहकार्यस्य विषये अपि चर्चां कृतवान्।

**राजनाथ -सैनिक विद्यालय**

रक्षामन्त्री राजनाथ सिंहः अद्य राजस्थानस्य जयपुरे एकस्य सैनिक विद्यालयस्य उद्घाटनम् करिष्यति। रक्षामन्त्रालयेन उक्तं यत् निजसंस्थाभिः, राज्यसर्वकारैः, निजविद्यालयैः च सह संयुक्तरूपेण देशे सर्वत्र शतं नूतनसैनिकविद्यालयानाम् स्थापना सर्वकारस्य दृष्टेः भागो विद्यते। मन्त्रालयेन सहभागविधायाः अन्तर्गतं पञ्च चत्वारिंशत् नूतनसैनिकविद्यालयानाम् अनुमोदनं कृतम् अस्ति। एते नवीनाः विद्यालयाः सैनिकविद्यालयसङ्घस्य आश्रये कार्यं करिष्यन्ति, नियमविनियमानाम् अनुसरणं च करिष्यन्ति।

**प्रधानमंत्री-दिसानायके**

श्रीलङ्कादेशे राष्ट्रपतिनिर्वाचने अनुरा-दिसानायके इत्यस्य विजयप्राप्ते: अनंतरं प्रधानमन्त्री नरेन्द्रमोदी अभिनन्दनं ख्यापितवान्। स्वसन्देशे श्रीमोदी अवदत् यत् भारतस्य **"नेबरहुड् फर्स्ट्"** इति प्रतिवेशीप्रथमं नीत्यानुसारं दृष्टि-सागरे श्रीलङ्का-देशस्य विशिष्ट स्थानं वर्तते। सः अवदत् यत्, सः जनानां सम्पूर्ण-क्षेत्रस्य च कल्याणाय बहुपक्षीयसहकार्यं अधिकं सुदृढीकर्तुं दिसानायकेन सह मिलित्वा कार्यं कर्तुं उत्सुकः अस्ति।

**<u>भारतीय दल</u>**

भारत क्रिकेटनियन्त्रणमण्डलेन बी.सी.सी.आई. इत्यनेन पुरुषक्रीडकचयनसमित्या बाङ्गलादेशं विरुद्धय द्वितीयस्पर्धायाः कृते भारतीयदलस्य घोषणा कृता। द्वितीय क्रीडायाः कृते दलं अपरिवर्तितं वर्तते इति चयनसमित्या पुष्टिः कृता अस्ति। अस्य मासस्य सप्तविंशतिः दिनाङ्कात् आरभ्य कानपुरनगरे इदं द्वन्द्वं भविष्यति। भारतेन बाङ्गलादेशं अशीत्यधिक द्विशतं धावनांकानां बृहद् अंकै : प्रथमाया: निकष स्पर्धायाः चतुर्थे दिने विजयं सम्प्राप्तम् । द्वितीयाया: निकष-क्रीडायाः भारतीयदले दलनायकः रोहित शर्मणम् समेत्य यशस्वीजायसवाल: शुभमन गिल: विराट कोहली, केएल राहुल: सरफराज खान: ऋषभ पन्त:, ध्रुव जुरेल: आर.अश्विन: रविन्द्र जडेजा, अक्षर पटेल: कुलदीप यादव: मोहम्मद सिराज: आकाश दीप: जसप्रीत बुमराह: यश दयाल: च सन्ति।